# माध्यमिकशिक्षापाठ्यक्रमः

## संस्कृतम् (ऐच्छिकम्)

**कक्षा : ९-१०** **विषयसङ्केतः : (कक्षा ९** San. 175 **कक्षा १०** San. 176)

**पाठ्यघण्टा : ४** **वार्षिककार्यघण्टा : १२८**

## १. परिचयः

आधुनिकविश्वस्य मानवानामपरिमितावश्यकताः सन्ति । मानवैरतुलितयत्नेन मनीषया च नानाविधासूपलब्धिष्वधिगतासु सतीष्वपि इमा आवश्यकताः प्रवर्धमाना एव दृश्यन्ते । विस्मयकारिणीभिरुपलब्धिभिरपि जनमनस्तृप्तिं नाप्नोतीव प्रतिभाति । अस्या मानवीयसमस्याया बीजकारणानुशीलनक्रमे शिक्षा शीर्षस्थानमधिवसति । सर्वासां समस्यानामुपलब्धीनां वाधारपीठिकायामपि शिक्षाया भूमिका बलवती भवति । शिक्षायाः स्वरूपेणैव समस्यानामुद्भव उपलब्धीनां समृद्धिर्वा निर्भरायेते । सैव शिक्षा फलदायिनी मन्तव्या या व्यक्ति-समाज-राष्ट्राणां सर्वोन्नतिं विदधाति आविश्वं मानवमूल्यमान्यताः प्रसार्य मानवजात्यापेक्षितं विश्वञ्च विनिर्माति । एतस्या वैश्विकावश्यकतायाः परिपूर्तये संस्कृतवाङ्मयं मौलीभूतमस्ति । संस्कृतस्यानादिकालिकज्ञानसम्पदो न केवलं व्यक्ते राष्ट्रस्य वा परमखिलविश्वस्यैव कृते सदैवोपयोगिन्यो वेविद्यन्ते । संस्कृतस्य स्वल्पोऽप्यंशः शिक्षायाः सर्वासां विधानामुपयोगित्वं संसाधयतीति नात्युक्तिः । संस्कृतस्याद्यतनं विश्वव्यापि जागरणमेतदेव तथ्यं प्रमाणयति । संस्कृतवाङ्मये सन्निहितेन मानवजीवनस्य सर्वोन्नतिकारकेणानेन प्रभूतज्ञानगौरवेण कोमलचेतसो विद्यार्थिनो लाभान्विता भवेयुरिति विचिन्त्य आधारभूतस्तरेऽधीतसंस्कृतानामनधीतसंस्कृतानाञ्च विद्यार्थिनां कृते सरलतया संस्कृतशिक्षणोद्देश्येन ९-१० कक्षयोः संस्कृतभाषायाः पाठ्यक्रमोऽयं विकसितो वर्तते ।

शिक्षाया राष्ट्रियोद्देश्यस्यावश्यकतायाश्च परिपूरणत्वेनाभिभावकानामभियाचनायाः परिपूर्तये, कृतविद्यानां शिक्षाविदाञ्च परामर्शनेन, संस्कृतप्रेमिणां प्रेरणया च निर्मितः पाठ्यक्रमोऽयमाधारभूतस्तरस्योच्चस्तरस्य च संस्कृतशिक्षायाः सेतुर्भूतो वर्तते । अनेन पाठ्यक्रमेणाधारभूतस्तरस्य ज्ञानशिल्पकौशलानि प्रवर्ध्य परिमार्ज्य चोच्चस्तरीयज्ञानशिल्पकौशलानि विकसय्य विषयवस्तुनः शास्त्रीयगाम्भीर्यस्यानुशीलनाय पूर्वपीठिका विनिर्मिताऽस्ति । पाठ्यक्रमेऽस्मिन् गद्यपद्ययोर्विधासु विषयक्षेत्रानुषङ्गिकविषयविस्तार-योग्यताविस्तारानुप्रयुक्तव्याकरणसम्बद्धानि विषयवस्तूनि समाविष्टानि वर्तन्ते । एतेषां विषयाणां सुशिक्षणेन विद्यार्थिनः संस्कृतभाषायां दैनिकव्यवहारे नैपुण्यमपाप्स्यन्तीत्यपेक्षितमस्ति । विद्यार्थिनां वयोऽनुरूपं रुच्यावश्यकते, समाजस्यापेक्षाम्, शिक्षाया उद्देश्यानि च लक्ष्यीकृत्यात्र पाठ्यवस्तूनि समाविष्टानि सन्ति । सर्वेषां पाठ्यवस्तूनां शिक्षणेन विद्यार्थिनो भाषायाश्चत्वारि शिल्पकौशलानि सारल्येन सहजतया चाधिगमिष्यन्ति । विषयवस्तुभिर्भाषिककौशलार्जनं भाषिककौशलाभ्यासेन विषयवस्तूनां गभीरानुशीलनपुरस्सरम् अनुकरणीयचरितनिर्माणाय उत्प्रेरणमुच्चस्तरीयसंस्कृतशिक्षाया अध्ययनाय योग्यत्वप्रवर्तनञ्चास्य पाठ्यक्रमस्य नवीनं वैशिष्ट्यं वर्तते । विद्यार्थि-शिक्षकाभिभावकानामध्यवसायेन पाठ्यक्रमोऽयं साफल्यमवाप्स्यतीति विश्वस्यते ।

पाठ्यक्रमोऽसौ विषयपरिचयः, स्तरगतयोग्यताः, कक्षागतशिक्षणोपलब्धयः, समग्रपाठ्यवस्तुविवरणम्, शिक्षणसहजीकरणप्रक्रिया, विद्यार्थिमूल्याङ्कनञ्चेत्यादिपक्षान् समाविश्य विकासं नीतोऽस्ति । पाठ्यक्रमेऽस्मिन्

प्रयोगसिद्धामाधुनिकशिक्षणपद्धतिमवलम्ब्य पाठ्यविषयाणां विस्तारस्तथा विहितोऽस्ति यथा चाधुनातनशिक्षणपद्धत्या अपेक्षितानि पाठ्यविषयोपलब्धिभूतानि विद्यार्थिनां श्रवण-भाषण-पठन-लेखन-कौशलानि विकसितानि भवेयुः, यथा च पुनस्ते पाठ्यविषयलक्ष्यभूता विषयज्ञान-बोध-शिल्पोच्चदक्षताः सारल्येन समवाप्नुयुः । अत्र सन्निविष्टा विषया विद्यार्थिनां शिल्पाभिवृत्त्यभिव्यक्तिकलानां विकासाय प्रयोगप्रधानं व्यावहारिकञ्च शिक्षणविधिं भृशमुपकुर्युरिति उद्देश्यञ्चानेन पाठ्यक्रमेणानेन आत्मसात्कृतो विषयः । पाठ्यक्रमनिहिता भाषिक-सामाजिक-नैतिक-पौराणिकैतिहासिक-काव्यीय-मनोवैज्ञानिक-सेवाविषयकाद्यनेकपक्षा विषयदृष्ट्या पाठ्यक्रमं सबलीकुर्युः, अपि च शिक्षणसहजीकरणसम्बद्धाः प्रदर्शनात्मकप्रश्नोत्तरप्रक्रिया, अभिनयात्मकसंवादः, स्वाध्यायपरामर्शपद्धतिः, औत्सुक्यवर्धकक्रियाकलापाः, निर्माणात्मकनिर्णयात्मकमूल्याङ्कन-प्रक्रिया, सैद्धान्तिकेन आन्तरेण च मूल्याङ्कनेन सिद्धा वैज्ञानिकी परीक्षणपद्धतिश्च शिक्षणपद्धतिदृष्ट्या पाठ्यक्रमम् अमुम् उपकुर्युरिति च पाठ्यक्रमेणानेन समुद्दिष्टो विषयः । पाठ्यक्रमेऽस्मिन् पाठ्यविषयसंयोजनविधौ, स्तरगतक्षमता-कक्षागतशिक्षणोपलब्धिविस्तारविधौ, शिक्षणविधि-मूल्याङ्कनप्रविधिप्रस्तुतौ च पूर्वकक्षाभिस्सह चोत्तरोत्तरं सोपानक्रमिकं सन्तुलनं स्यादिति विषये विशेषावधानं दत्तमस्ति । केवलसैद्धान्तिकज्ञानापेक्षया विद्यार्थिनामाचार-व्यवहार-विचारादिसम्बलितं चतुरस्रं व्यक्तित्वं वर्धेत इति पाठ्यक्रमस्यास्य प्रधानं लक्ष्यमस्ति ।

## २. विषयानुगताः क्षमताः

**माध्यमिकस्तरस्य नवमदशमकक्षयोः संस्कृतभाषाविषयमधीत्य विद्यार्थिनोऽधस्तनविषयेषु क्षमा भविष्यन्ति -**

१. वर्ण-शब्द-वाक्यानां यथाविधि उच्चारणे

२. संस्कृतभाषायाः संस्कृतवाङ्मयस्य च परिचयमधिगत्य अनयोऽनुशीलनाय जागरणप्रदर्शने

३. संस्कृतस्य गद्यपद्यरचनयोर्यथानियमं प्रवाचने

४. नेपालीभाषायां मातृभाषायाञ्च बाहुल्येन प्रयुज्यमानानां संस्कृतशब्दानां परिचयमवाप्य तेषामर्थानुकूलप्रयोगे

५. नैपालकसंस्कृतेर्वैशिष्ट्यमनुशील्य स्वसंस्कृतेः पालनायाम्

६. नेपालीभाषायां मातृभाषायां संस्कृतौ च संस्कृतस्य सम्बन्धान्वेषणे

७. संस्कृतस्योच्चशिक्षायै योग्यताजनपूर्वकं मौलिकविशेषतानां प्रस्तुतौ

८. भाषिककौशलार्जनपूर्वकं सदाचारप्रदर्शने

९. सर्वविधेषु प्राकृतवस्तुषु प्राणिषु च समभावं प्रदर्श्य पर्यावरणस्य संरक्षणे

१०. सामाजिकशिष्टाचारं परिपाल्य राष्ट्रियतायामौत्सुक्यप्रदर्शने

११. सरलसंस्कृतभाषया दैनिकव्यवहरणे

## ३. कक्षागतशिक्षणोपलब्धयः

कक्षा ९

श्रवणं भाषणञ्च

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. वर्णानां पदानां वाक्यानाञ्च अनूच्चारणम् | १.१ देवनागरीलिपिगतान् वर्णान् श्रुत्वा शुद्धतया उच्चारणम्<br>१.२ संस्कृतपदानां यथाश्रुति अनूच्चारणम्<br>१.३ पठितानामपठितानाञ्च वाक्यानां शुद्धोच्चारणम् |
| २. श्रुतानां गद्यपद्यांशानां वाचनम् | २.१ गद्यांशं श्रुत्वा तदनुरूपं वाचनम्<br>२.२ पठितस्य गद्यांशस्य नियमानुकूलं भाषणम्<br>२.३ लयमनुसृत्य पद्यस्यानुवाचनम्<br>२.४ पठितपद्यानां गति-यति-लयनिर्धारणेन उच्चारणम् |
| ३. यथालयं श्रुतस्य गीतस्य गायनम् | ३.१ श्रुतस्य गीतस्य लयानुशीलनम्<br>३.२ पाठस्थगीतस्य यथालयं गायनम्<br>३.३ गीतस्थपदानां लयानुकूलं वाचनम्<br>३.४ गीतं श्रुत्वा तद्गतभावप्रकटनम् |
| ४. पठितपदानामर्थापनेन वाक्येषु प्रयोगः | ४.१ पठितपदानां सन्दर्भानुकूलमर्थप्रकटनम्<br>४.२ अर्थं श्रुत्वा पाठस्थशब्दानां कथनम्<br>४.३ पदार्थाननुशील्य वाक्यार्थप्रकाशनम्<br>४.४ पठितपदानां वाक्येषु योजनम् |
| ५. पठितविषयाधारेण प्रश्नोत्तरणम् | ५.१ पठितविषयमाधृत्य प्रश्ननिर्माणम्<br>५.२ पठितविषयेषु जिज्ञासाभिव्यञ्जनम्<br>५.३ पठितविषयाधृतप्रश्नानामुत्तरणम् |
| ६. श्रुतस्य पठितस्य वा विषयवस्तुनः सार-भाव-संरचना-क्रमाणां कथनं पाठस्थचरितानां परिचायनञ्च | ६.१ पठितस्य श्रुतस्य वा विषयवस्तुनः सारस्य भावस्य वा कथनम्<br>६.२ निर्दिष्टविषयवस्तुनो विधागतसंरचनाया अभिव्यञ्जनम्<br>६.३ निर्धारितविषयवस्तूनां श्रवणेन यथाक्रमं प्रस्तुतिः<br>६.४ पाठस्थचरितानां सपरिचयं वैशिष्ट्यप्रकाशनम् |
| ७. परिचितविषयेषु स्वाभिमतप्रकटनम् | ७.१ श्रुतस्य दृष्टस्य पठितस्य वा विषयवस्तुनः स्वशब्दैः कथनम्<br>७.२ अनुभूतविषयस्य वर्णनम्<br>७.३ परिचितसमस्यायां स्वमतप्रकाशनम् |
| ८. पाठे प्रयुक्तानां भाषातत्त्वानां स्वरूपकथनम् | ८.१ पाठानुप्रयुक्तसन्धीनां स्वरूपनिर्धारणम् |

| | |
|---|---|
| | ८.२ निर्दिष्टानां शब्दानां धातूनाञ्च रूपावलिकथनम्<br>८.३ पाठप्रयुक्तानामव्ययपदानां निदर्शनम्<br>८.४ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठप्रयुक्तानां पदानामभिव्यञ्जनम्<br>८.५ पाठस्थवाक्येषु प्रयुक्तानां पदानां कारकविभक्तिनिर्देशनम् |

पठनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. यथालयं पद्यस्य गीतस्य च वाचनम् | १.१ लयमनुसृत्य पद्यस्य पठनम्<br>१.२ पद्यं पठित्वा यतिस्थलनिश्चयनम्<br>१.३ लयावगमपूर्वकं गीतस्य पठनम्<br>१.४ गीतं पठित्वा गीतस्य भावप्रकाशनम् |
| २. विषयबोधपूर्वकं निर्धारितगद्यांशस्य पठनम् | २.१ गद्यांशस्य समस्तपदानां द्रुतपठनम्<br>२.२ गद्यांशस्य मौनपठनेन तद्गतविषयप्रकाशनम्<br>२.३ गद्यांशमधीत्य तस्य सारसन्देशकथनम्<br>२.४ सन्धिस्थलानि निश्चित्य निर्धारितगद्यांशस्य पठनम्<br>२.५ विरामादिचिह्नानां पालनेन गद्यांशस्य सस्वरं वाचनम्<br>२.६ पाठ्यांशमधीत्य प्रमुखविषयाणां सूत्रीकरणम्<br>२.७ पाठ्यवस्तूनां मौनपठनेन अज्ञातार्थानां पदानां सङ्कलनम् |
| ३. निर्धारितसंवादस्य पठनम् | ३.१ संवादं पठित्वा तस्य संरचनागततत्त्वानां सूचीनिर्माणम्<br>३.२ सख्या सह संवादस्य साभिनयं पठनम्<br>३.३. निर्धारितसंवादमधीत्य तद्गतविषयप्रकाशनम् |
| ४. निर्दिष्टविषयवस्तून्यधीत्य प्रश्नोत्तरणम् | ४.१ पठितस्य पाठस्य विषयसम्बद्धप्रश्ननिर्माणम्<br>४.२ पाठं पठित्वा विषयवस्तुनः संक्षेपेण प्रकटनम्<br>४.३ निर्दिष्टविषयवस्तुनोऽध्ययनेन तत्सम्बद्धप्रश्नानामुत्तरणम्<br>४.४ पाठमधीत्य सारगर्भितवाक्यानां भावविस्तरणम् |
| ५. पाठातिरिक्तानां सामग्रीणां पठनेन विषयवर्णनम् | ५.१ पठातिरिक्ता निर्दिष्टसामग्रीः पठित्वा तासां विषयप्रकाशनम्<br>५.२ श्रुतस्य दृष्टस्य पठितस्य वा वस्तुनो विषयेऽभिव्यञ्जनम्<br>५.३ अनुभूतिमाधृत्य सामयिकविषये स्वाभिमतप्रकटनम् |
| ६. पाठगतभाषातत्त्वानामनुशीलनम् | ६.१ संस्कृतस्य गद्यपद्ययोः सन्धिविच्छेदपुरःसरं पठनम्<br>६.२ मात्रामनुसृत्य यथाकालं पदगतवर्णानां पठनम्<br>६.३ निदिष्टानां धातूनां शब्दानाञ्च रूपावल्यास्तत्प्रयोगेण निर्मितवाक्यानाञ्च पठनम् |

| | |
|---|---|
| | ६.४ पाठं पठित्वा निर्दिष्टप्रत्ययैर्निष्पन्नानां पदानां सूचीकरणम्<br>६.५ पाठितपाठाद् निर्दिष्टकारकविभक्त्योरुदाहरणानामन्वेषणम्<br>६.६ पाठस्य मौनपठनेन निर्दिष्टकालद्योतकानां क्रियापदानां सूचीनिर्माणम्<br>६.७ पाठ्यांशे प्रयुक्तानामव्ययपदानां पाठानुकूलमर्थनिर्धारणम् |
| ७. पाठगतानामानुषङ्गिकविषयाणा-मध्ययनम् | ७.१ स्वागताभिवादन-कुशलवार्तासम्बद्धनिर्धारितसामग्रीः पठित्वा तासामनुशीलनम्<br>७.२ निर्धारितसामग्रीणां पठनेन व्यावसायिकापणिक-साञ्चारिक-खाद्यवस्तुवाचकशब्दैर्व्यवहरणम्<br>७.३ सङ्ख्या-समयवाचकनिर्धारितशब्दानां पठनं प्रयोगश्च<br>७.४ निर्धारितविषयाणामध्ययनेन विशिष्टमहिमयुतानां स्थलानां चरितानाञ्च परिचायनम्<br>७.५ निर्दिष्टसामग्रीणां पठनेन संस्कृतेः सेवाभावस्य चानुशीलनम् |

लेखनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. पदानां वाक्यानाञ्च शुद्धतया लेखनम् | १.१ पदानां वाक्यानाञ्च श्रुतलेखनम्<br>१.२ पदानां वाक्यानाञ्च शुद्धतयानुलेखनम्<br>१.३ अशुद्धिनिराकरणेन पदानां वाक्यानाञ्च लेखनम्<br>१.४ पठितपदानां शुद्धलेखनम् |
| २. पठितपदानामर्थानुकूलवाक्येषु योजनम् | २.१ पठितपदानां पाठानुकूल्येनार्थापनम्<br>२.२ पठितपदानां पर्यायान्वेषणं प्रयोगश्च<br>२.३ अनेकार्थकपदानां प्रयोगप्रदर्शनम्<br>२.४ ज्ञातार्थपदानां पाठस्थविलोमदानामन्वेषणम्<br>२.५ पठितपदानां योजनेन वाक्यनिर्माणम् |
| ३. अनुच्छेदं पठित्वा प्रश्नोत्तरणम् | ३.१ सरलसुबोधवाक्यैर्निमितादनुच्छेदाद् बोधप्रश्नानां निर्माणम्<br>३.२ निर्दिष्टानुच्छेदान्निर्मितानां प्रश्नानामुत्तरणम्<br>३.३ निर्दिष्टानुच्छेदस्य सङ्क्षेपीकरणं सारलेखनञ्च<br>३.४ निर्दिष्टानुच्छेदस्य प्रमुखविषयाणां सूत्राङ्कनम् |
| ४. पठितविषयमाधृत्य प्रश्ननिर्माणमुत्तरप्रदानञ्च | ४.१ पठितविषयवस्तुनः प्रश्नोपस्थापनम्<br>४.२ पठितवाक्यस्थपदानां प्रश्नार्थकपदैः प्रतिष्ठापनम्<br>४.३ प्रश्नप्रकृतिमभिज्ञाय तदनुसारेणोत्तरप्रदानम्<br>४.४ पाठसम्बद्धप्रश्नानामुत्तरलेखनम् |

| | |
|---|---|
| ५. निर्धारितगद्यपद्यांशयोर्विषयप्रकाशनम् | ५.१ पठितगद्यानां सार-सन्देशलेखनम्<br>५.२ पठितानां पद्यानां गीतानाञ्च भावार्थप्रकाशनम्<br>५.३ पाठगतानां सुभाषितानां भावविशदीकरणम्<br>५.४ पाठगतचरितानां चारित्रिकवैशिष्ट्यविश्लेषणम्<br>५.५ पठितविषयाणां सतर्कं वर्णनम्<br>५.६ पाठगतानां विशिष्टवाक्यानां सप्रसङ्गं व्याख्यानम् |
| ६. निर्दिष्टविषयेषु सर्जनात्मकलेखनम् | ६.१ परिचितविषयाणां लिखितवर्णनम्<br>६.२ सूत्राण्याधृत्य कथालेखनम्<br>६.३ पद्यस्य संवादस्य च स्वशब्दैर्गद्ये रूपान्तरणम्<br>६.४ स्वकीयवैयक्तिकविवरणस्य निर्माणम्<br>६.५ शुभकामना-कार्यालयीयपत्रयोर्लेखनम्<br>६.६ अनुभूतविषयमवलम्ब्यानुच्छेदरचना |
| ७. आनुषङ्गिकविषयमनुशील्य मौलिकलेखनम् | ७.१ स्वागताभिवादन-कुशलवार्तावसरेषु प्रयोक्तव्यानां वाक्यानां लेखनम्<br>७.२ व्यावसायिकापणिक-साञ्चारिक-खाद्यवस्तुवाचकशब्दैर्वाक्यरचना<br>७.३ निर्धारितसङ्ख्या-समयवाचकशब्दानां प्रयोगेण व्यावहारिकवाक्यानां लेखनम्<br>७.४ निर्दिष्टविषयमाधृत्य महिमयुतानां स्थलानां चरितानाञ्च वर्णनम्<br>७.५ निर्दिष्टायाः संस्कृतेः सेवाभावस्य महत्त्वबोधकानुच्छेदलेखनम्<br>७.६ वेदोपनिषत्पुराणमनुस्मृतीनां परिचायनेन अनुशासनस्य भक्तेर्नारीशक्तेश्च महिमप्रकाशनम्<br>७.७ पाठ्यवस्त्वाधारेण जातेर्भौगोलिकक्षेत्रस्य च वर्णनम् |
| ८. सरलवाक्यानामनुवादः | ८.१ पठितसंस्कृतवाक्यानां नेपालिभाषायामनुवादः<br>८.२ नेपालिभाषयाः सरलवाक्यानां संस्कृतेऽनुवादः<br>८.३ प्रदत्तस्य पठितानुच्छेदस्य नेपालिभाषायामनुवादः |
| ९. पाठे प्रयुक्तानां भाषातत्त्वानां प्रयोगः | ८.१ पठितनियमानाधृत्य सन्धिविधानं सन्धिविच्छेदनञ्च<br>८.२ निर्दिष्टानां शब्दानां धातूनाञ्च रूपावल्याः प्रयोगः<br>८.३ पाठप्रयुक्तानामव्ययपदानां वाक्येषु योजनम्<br>८.४ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठप्रयुक्तानां पदानां प्रकृतिप्रत्ययविच्छेदनं वाक्येषु प्रयोगश्च<br>८.५ पाठे प्रयुक्तानां कारकविभक्तीनां यथानिर्देशं प्रयोगः |

कक्षा १०

श्रवणं भाषणञ्च

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
| --- | --- |
| १. वर्णा-पद-वाक्यानुच्छेदानामनूच्चारणम् | १.१ श्रुतानां वर्णानां शुद्धोच्चारणम्<br>१.२ संस्कृतपदानामनूच्चारणम्<br>१.३ अधीतानधीतानां वाक्यानामनुच्छेदानाञ्चानुवाचनम् |
| २. गद्यपद्यांशानां यथाश्रुति वाचनम् | २.१ गद्यांशस्य सस्वरं वाचनम्<br>२.२ पठितस्य गद्यांशस्य यथाविधि भाषणम्<br>२.३ लयं परिपाल्य पद्यस्यानुवाचनम्<br>२.४ गति-यति-लयनिर्धारणेन पठितपद्यानामुच्चारणम् |
| ३. गीतस्य श्रवणेन यथालयं गायनम् | ३.१ गीतं श्रुत्वा लयानुशीलनम्<br>३.२ निर्दिष्टगीतस्य यथालयं गायनम्<br>३.३ लयं निश्चित्य गीतस्थपदानां वाचनम्<br>३.४ श्रुतस्य गीतस्य भावाभिव्यञ्जनम् |
| ४. पठितपदानां सार्थं वाक्येषु प्रयोगः | ४.१ पदानां पाठानुकूलमर्थप्रकटनम्<br>४.२ अर्थं श्रुत्वा पाठस्थशब्दानां कथनम्<br>४.३ पदार्थाननुशील्य वाक्यार्थप्रकाशनम्<br>४.४ पठितपदानामर्थानुशीलनेन वाक्येषु योजनम् |
| ५. पठितविषयमाधृत्य प्रश्नोत्तरणम् | ५.१ पठितविषयात् प्रश्ननिर्माणम्<br>५.२ पठितविषयेषु जिज्ञासोद्भावनम्<br>५.३ अधीतविषयाधृतप्रश्नानामुत्तरणम् |
| ६. श्रुतस्य पठितस्य वा विषयस्य सार-भाव-संरचना-क्रमाणां पाठस्थचरितानां परिचायनञ्च | ६.१ पठितस्य श्रुतस्य वा विषयवस्तुनः सारांशभावार्थप्रकाशनम्<br>६.२ पठितविषयवस्तुनो विधागतसंरचनाया अभिव्यञ्जनम्<br>६.३ अधीतविषयवस्तूनां यथाक्रमं प्रस्तुतिः<br>६.४ पाठस्थचरितानां वैशिष्ट्यप्रकाशनम् |
| ७. परिचितविषयेषु स्वाभिमतप्रकटनम् | ७.१ श्रुतस्य दृष्टस्य पठितस्य वा विषयवस्तुनः परिचायनम्<br>७.२ अनुभूतविषयस्य विश्लेषणम्<br>७.३ परिचितसामाजिकसमस्यायाः समाधानोपायप्रदर्शनम् |
| ८. पाठगतानां भाषातत्त्वानां परिचायनम् | ८.१ पाठानुप्रयुक्तसन्धीनां नामाङ्कनम् |

| | |
|---|---|
| | ८.२ निर्दिष्टानां शब्दानां धातूनाञ्च रूपावलिकथनम्<br>८.३ पाठप्रयुक्तानामव्ययपदानां सान्दर्भिकार्थप्रकाशनम्<br>८.४ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठप्रयुक्तानां पदानां प्रकृतिप्रत्ययनिर्धारणम्<br>८.५ पाठस्थवाक्येषु प्रयुक्तानां पदानां कारकविभक्तिनिर्देशनम्<br>८.६ पाठप्रयुक्तपदानां लिङ्ग-वचननिदर्शनम् |

पठनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. लयमनुसृत्य पद्यस्य गीतस्य च वाचनम् | १.१ गति-यति-लयनिर्धारणेन पद्यस्य पठनम्<br>१.२ पद्यं पठित्वा यतिनिर्धारणम्<br>१.३ लयबोधपुरःसरं गीतस्य गायनम्<br>१.४ पठितस्य गीतस्य भावप्रकाशनम् |
| २. विषयावगमेन निर्धारितगद्यांशस्य पठनम् | २.१ गद्यांशस्य द्रुतपठनम्<br>२.२ गद्यांशस्य मौनपठनं विधाय तद्गतविषयप्रकाशनम्<br>२.३ अधीतस्य गद्यांशस्य सारसन्देशकथनम्<br>२.४ सन्धियुतपदानि परिचित्य निर्धारितगद्यांशस्य पठनम्<br>२.५ लेख्यचिह्नानां पालनेन गद्यांशस्य सस्वरं साभिनयञ्च वाचनम्<br>२.६ पाठ्यांशपठनेन प्रमुखविषयाणां सङ्क्षेपेण प्रस्तुतिः<br>२.७ पाठ्यवस्तुनोऽज्ञातार्थानां पदानां सङ्कलनम् |
| ३. निर्धारितसंवादाध्ययनेन विषयप्रकाशनम् | ३.१ संवादं पठित्वा प्रमुखविषयाणां सूत्ररूपेण निगदनम्<br>३.२ परिवेशं प्रकल्प्य संवादस्य साभिनयं पठनम्<br>३.३. निर्धारितसंवादमधीत्य सन्देशप्रकाशनम् |
| ४. निर्दिष्टविषयवस्त्वाश्रित्य प्रश्नोत्तरणम् | ४.१ पाठस्य विषयमाधृत्य प्रश्ननिर्माणम्<br>४.२ पठितपाठस्थविषयवस्तुनः प्रकटनम्<br>४.३ अधीतविषयवस्तुन उद्धृतप्रश्नानामुत्तरणम्<br>४.४ पाठं पठित्वा सारवाक्यानां भावविस्तरणम् |
| ५. पाठेतरसामग्रीणां पठनेन विषयवस्तूनां प्रकाशनम् | ५.१ पाठेतरा निर्दिष्टसामग्रीरधीत्य तद्गतविषयवर्णनम्<br>५.२ श्रुतस्य दृष्टस्य पठितस्य वा वस्तुनो विषयाभिव्यञ्जनम्<br>५.३ अनुभूतेषु सामयिकविषयेषु स्वाभिमतप्रकटनम् |
| ६. पाठगतभाषातत्त्वानामनुशीलनम् | ६.१ माहेश्वरसूत्राणां यथाक्रमं पठनम्<br>६.२ प्रत्याहारनिर्मितिप्रक्रियायाः पठनेन अणादिप्रत्याहारेषु |

| | |
|---|---|
| | समागतानां वर्णानां निगदनम्<br>६.३ वर्णोच्चारणस्थानानां पठनेन वर्णानामुच्चारणस्थाननिर्धारणम्<br>६.४ संस्कृतभाषाया गद्यपद्ययोः सन्धिविच्छेदपुरःसरं पठनम्<br>६.५ निर्धारितानां धातूनां शब्दानाञ्च रूपावल्यास्तत्प्रयोगेण निर्मितवाक्यानाञ्च पठनम्<br>६.६ निर्दिष्टधातूनां रूपावल्याः पठनेन कालनिर्धारणम्<br>६.७ पाठं पठित्वा निर्दिष्टप्रत्ययैर्निष्पन्नानां पदानां सङ्कलनम्<br>६.८ पाठितपाठाद् निर्दिष्टकारकविभक्त्योरुदाहरणानामन्वेषणम्<br>६.९ पाठस्य मौनपठनेन उपसर्गसहितानां समस्तानाञ्च पदानां सूचीकरणम्<br>६.१० पाठितानामव्ययपदानां पाठानुकूलमर्थनिर्धारणम्<br>६.११ पाठप्रयुक्तानां सुबन्तपदानां लिङ्ग-वचन-विभक्तिज्ञानपूर्वकं पठनम् |
| ७. पाठसम्बद्धानुषङ्गिकविषयाणां पठनम् | ७.१ निर्धारितविषयाध्ययनेन पूज्यदेवानां पूजोपचाराणाञ्च परिचायनम्<br>७.२ निर्धारितसामग्रीरधीत्य निर्दिष्टजाति-संस्कृति-संस्कार-पर्व-परम्पराणां सपरिचयं वैशिष्ट्यकथनम्<br>७.३ निर्धारितानां सङ्ख्यावाचकानां प्राविधिकानाञ्च शब्दानां पठनेन प्रयोगः<br>७.४ पाठ्यवस्तु पठित्वा वैदिकलौकिकसंस्कृतस्य दर्शनानाञ्च परिचायनेन नीतेर्गीतायाश्च निर्दिष्टपक्षाणामनुशीलनम्<br>७.५ निर्दिष्टसामग्रीणां पठनेन आत्मगौरवभावप्रकटनम्<br>७.६ सपरिचयं निर्दिष्टस्य शिलापत्रस्य ताम्रपत्रस्य च पठनम्<br>७.७ पठितविषयाणामनुशीलनेन संवेगव्यवास्थपनोपायानां कथनम्<br>७.८ निर्दिष्टविषयं पठित्वा नैपालकप्रकृतिजलवायूनां परिचायनम्<br>७.९ निर्धारितविषयमधीत्य वैज्ञानिकाविष्काराणां महत्त्वाख्यापनम् |

लेखनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. पद-वाक्यानुच्छेदानां शुद्धलेखनम् | १.१ पदानां वाक्यानाञ्च श्रुतलेखनम्<br>१.२ पद-वाक्यानुच्छेदानामनुलेखनम्<br>१.३ अशुद्धिनिराकरणपुरःसरं पद-वाक्यानुच्छेदानां पुनर्लेखनम्<br>१.४ पठितपदवाक्ययोः शुद्धलेखनम् |
| २. अर्थानुशीलनेन पठितपदानां वाक्येषु योजनम् | २.१ सन्दर्भं विचार्य पठितपदानामर्थापनम् |

| | |
|---|---|
| | २.२ वाक्यानुच्छेदस्थानां निर्दिष्टपदानां पर्यायपदैः प्रतिष्ठापनम्<br>२.३ पठितानामनेकार्थकपदानां यथासन्दर्भं प्रयोगकौशलप्रदर्शनम्<br>२.४ विपर्ययपदैर्निर्दिष्टपदानि प्रतिष्ठाप्य विलोमार्थे वाक्यस्य परिवर्तनम्<br>२.५ पठितपदानां योजनेन मौलिकवाक्यनिर्माणम् |
| ३. अनुच्छेदस्य पठनेन प्रश्नोत्तरणम् | ३.१ सरलवाक्यै रचितादनुच्छेदाद् बोधप्रश्नानां निर्माणम्<br>३.२ निर्दिष्टानुच्छेदसम्बद्धप्रश्नानामुत्तरणम्<br>३.३ निर्दिष्टानुच्छेदस्य सारलेखनम्<br>३.४ प्रमुखविषयान् सूत्रीकृत्य निर्दिष्टानुच्छेदस्य सङ्क्षेपीकरणम् |
| ४. पठितविषयमाधृत्य प्रश्नोत्तरणम् | ४.१ पठितविषयेषु प्रश्नोपस्थापनम्<br>४.२ प्रश्नार्थकपदैर्वाक्यस्थपदानां प्रतिष्ठापनेन प्रश्नार्थे वाक्यपरिवर्तनम्<br>४.३ प्रश्नप्रकृतिबोधपूर्वकमुत्तरलेखनम्<br>४.४ पाठसम्बद्धानां प्रश्नानामुत्तरप्रदानम् |
| ५. पाठ्यवस्तुनो विषयप्रकाशनम् | ५.१ पठितगद्यगतविषयाणां सार-सन्देशलेखनम्<br>५.२ पठितस्य पद्यस्य गीतस्य च भावार्थलेखनम्<br>५.३ पाठस्थसुभाषितानां भावप्रकाशनम्<br>५.४ पाठगतचरितानां चारित्र्यविश्लेषणम्<br>५.५ सतर्कं पठितविषयाणामुपस्थापनम्<br>५.६ सन्दर्भप्रसङ्गयोर्निदर्शनेन पाठगतविशिष्टवाक्यानां व्याख्यानम् |
| ६. निर्दिष्टविषयमनुसृत्य सर्जनात्मकलेखनम् | ६.१ अनुभूतविषयाणां मौलिकवर्णनम्<br>६.२ सूत्राधारेण कथाया लघुप्रबन्धस्य च लेखनम्<br>६.३ पद्ये निबद्धविषयस्य गद्यमाध्यमेन विस्तरणम्<br>६.४ संवादकथयोः प्रत्यक्षकथनानामप्रत्यक्षकथनशैल्या लेखनम्<br>६.५ वर्धापनज्ञापकस्य वैयक्तिकस्य च निदर्शनपत्रस्य लेखनम्<br>६.६ समयनिदर्शनेन एकस्मिन् दिवसे सम्पादितानां स्वकीयकार्याणां पूर्णवाक्यैर्विवरणलेखनम्<br>६.७ प्रदत्तविवरणाधारेण जीवनवृत्तलेखनम्<br>६.८ परिचितविषयमवलम्ब्य अनुच्छेदरचना |
| ७. पाठगतानुषङ्गिकविषयमनुशील्य | ७.१ पूज्यदेवानां परिचायनेन पूजोपचारक्रमनिदर्शनम् |

| | |
|---|---|
| मौलिकलेखनम् | ७.२ निर्दिष्टजाति-संस्कृति-संस्कार-पर्व-परम्पराणां वैशिष्ट्यप्रकाशनम्<br>७.३ निर्धारितानां सङ्ख्यावाचकानां प्राविधिकानाञ्च शब्दानां वाक्येषु प्रयोगः<br>७.४ वैदिकलौकिकसंस्कृतस्य दर्शनानाञ्च परिचायनम्<br>७.५ सपरिचयं नीतेर्गीतायाश्च निर्दिष्टविषयाणां प्रेरकत्वसाधनम्<br>७.५ निर्दिष्टविषयाणामनुशीलनेनात्मगौरवस्य राष्ट्रभक्तेश्च भावप्रकाशनम्<br>७.६ पठितशिलापत्र-ताम्रपत्रत ऐतिह्यतथ्यानां सङ्कलनम्<br>७.७ पाठाधारेण मनसो बन्धनमोक्षयोः कारणानि निर्दिश्य संवेगव्यवास्थपनोपायनिदर्शनम्<br>७.८ नैपालकप्रकृतिजलवायूनां परिचयोपस्थापनम्<br>७.९ पाठ्यवस्त्वाधृत्य वैज्ञानिकाविष्काराणां सपरिचयं महत्त्वविवेचनम्<br>७.१० निर्दिष्टविषयसम्बद्धायै प्रेरकवार्तायै संवादवाक्यलेखनम् |
| ८. सरलवाक्यानामनुवादः | ८.१ पठितसंस्कृतवाक्यानां नेपालिभाषायामनुवादः<br>८.२ नेपालिभाषयाः सरलवाक्यानां संस्कृतेऽनुवादः<br>८.३ प्रदत्तयोः पठितगद्यांशपद्यांशयोर्नेपालिभाषायामनुवादः |
| ९. पाठे प्रयुक्तानां भाषातत्त्वानां प्रयोगः | ९.१ माहेश्वरसूत्राणां यथाक्रमं लेखनम्<br>९.२ अणादिप्रत्याहारेषु समागतानां वर्णानां क्रममनतिक्रम्य लेखनम्<br>९.३ वर्णानामुच्चारणस्थानलेखनम्<br>९.४ पठितसन्धिनियमाननुशील्य संस्कृतभाषया निबद्धेषु गद्यपद्येषु सन्धिविधानं सन्धिच्छेदनञ्च<br>९.५ निर्धारितानां धातूनां शब्दानाञ्च रूपावल्या वाक्येषु प्रयोगः<br>९.६ निर्दिष्टधातूनां रूपावल्या अनुशीलनेन निर्दिष्टकालस्य वाक्यरचना<br>९.७ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठगतपदानां प्रकृतिप्रत्यययोर्विच्छेदनम्<br>९.८ पाठाधृतकारकनियमाननुशील्य निर्देशानुसारेण वाक्येषु समुचितविभक्तीनां प्रयोगः<br>९.९ पाठप्रयुक्तानां सोपसर्गपदानामुपसर्गनिदर्शनम्<br>९.१० पाठे प्रयुक्तेषु समस्तपदेष्वन्तर्भूतानां पदानां निश्चयनम्<br>९.११ पठितानामव्ययपदानां प्रयोगेण वाक्यनिर्माणम् |

| | |
|---|---|
| | ९.१२ पाठप्रयुक्तानां सुबन्तपदानां लिङ्ग-वचन-विभक्तिनिर्देशः |

## ४. विषयक्षेत्रं क्रमश्च

कक्षा ९

| क्र. सं | विधा | विषयक्षेत्रम् | आनुषङ्गिक-विषयविस्तारः | योग्यताविस्तारः | अनुप्रयुक्तव्याकरणम् | शिक्षण घण्टा | पूर्णाङ्काः |
|---|---|---|---|---|---|---|---|
| १ | गानम् | सांस्कृतिकम् | स्वागतसंस्कृतिः | लयबोधः, अतिथिस्वागतम्, वर्णव्यायामः | वर्णः, ह्रस्वदीर्घवर्णपरिचयः, वर्णसंयोजनेन शब्दनिर्माणम् | ६ | ५ |
| २ | संवादः | व्यावहारिकः | परिचयप्रदानम् | व्यावसायिक-शब्दज्ञानम् | अकारान्तपुँल्लिङ्गस्य, आकारान्तस्त्रीलिङ्गस्य, अकारान्तनपुंसकलिङ्गस्य च कर्तृकर्मणोः प्रयोगः, वर्तमानकालिक-क्रियापदानां परिचयः प्रयोगश्च (तत्-किम्शब्दयोरभ्यासः), प्रश्नबोधकाव्ययानि | १० | ८ |
| ३ | सूक्तिः | चारित्रिकी | अनुशासनशिक्षा, वेदोपनिषदोः परिचयः | मान्याभिवादनम्, कुशलविषयिणी वार्ता | क्त्वा-ल्यप्-तुमुन्प्रत्ययाः, करणकारकं, दीर्घसन्धिः | ६ | ५ |
| ४. | कथा | पौराणिकी | पुराणपरिचयः, भक्तिमहिमा | यात्रावर्णनम्, खाद्यशब्दज्ञानम्, आपणिकव्यवहारः, एकतो विंशतिपर्यन्तं सङ्ख्याप्रयोगः, सङ्ख्यापरिमाणबोधकप्रश्नः | भूतकालिकक्रियापदानि, सम्प्रदानकारकम्, गुणवृद्धिसन्धिः | १२ | १० |
| ५ | प्रबन्धः | सांस्कृतिकः | संस्कृतेर्महत्त्वम् | समयज्ञानम्, शब्दसाहाय्येन | यण्-श्चुत्व- जश्त्व-चर्त्व- | १२ | १० |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | ( तराईक्षेत्रसम्बद्धः) | | अनुच्छेदपूरणम्, मगरसंस्कृतिः | ष्टुत्वसन्धिः, अपादानकारकम्, तसिल्प्रत्ययः, भविष्यत्कालप्रयोगः | | |
| ६ | कविता | नैतिकी | मनुस्मृतेश्चाणक्यनीतेश्च परिचयः, नारीशक्तेर्महिमा | समस्याबोधः, सेवाभावविकासः (अवस्थाप्रदानम्) | षष्ठीविभक्तिप्रयोगः | ६ | ५ |
| ७ | पत्रम् | कार्यालयीयम् | निवेदनलेखनम् | पर्वोत्सवानां शुभकामनापत्रलेखनम्, प्रशंसा-कृतज्ञता-क्षमासूचकानां शब्दानां ज्ञानम् | पूर्वसवर्णपरसवर्णसन्धिः, अधिकरणकारकम्, युष्मदस्मच्छब्दाभ्यासः | ९ | ७ |
| ८. | संवादः | सांस्कृतिकः | नेपालस्य पश्चिमक्षेत्रे प्रचलिता संस्कृतिः | सांस्कृतिकविशेषताभिर्युक्तस्थलानां ज्ञानम्, संस्कृतिविकृत्योर्भेदः | विध्यर्थप्रयोगः (लोट्), उत्वपूर्वरूपसन्धिः, विसर्गलोपनियमः | १२ | ८ |
| ९. | प्रबन्धः | भौगोलिकः | नेपालस्य पूर्वक्षेत्रस्य परिचयः | विविधानां जातिभूगोलसम्बद्धानां शब्दानां साहाय्येन चित्रवर्णनम्, नेपालस्य पौराणिकस्थलस्य परिचयः | उपपदविभक्तिप्रयोगः, रुत्वसत्वसन्धिः | ९ | ७ |
| १० | कथा | वैज्ञानिकी | वैदिकविज्ञानम् | साञ्चारिकशब्दज्ञानम्, घटनाक्रमसंयोजनेन कथारचना | अव्ययानि, क्तवतुप्रत्ययः | ७ | ५ |
| ११. | जीवनवृत्तम् | राष्ट्रस्यैकीकरणे योगदानकर्तृकनारीविषयकम् | राष्ट्रपरिचयः, नेपालनामकरणम् | एकताया महत्त्वम्, नेपालदेशीयर्षीणां जन्मस्थानपरिचयः, | क्तप्रत्ययः | ७ | ५ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | प्रश्नार्थकवाक्यनिर्माणम् | | | |
| सैद्धान्तिकाभ्यासः | | | | | | ९६ | ७५ |
| प्रयोगाभ्यासः | | | | | | ३२ | २५ |
| योगः | | | | | | १२८ | १०० |

कक्षा १०

| क्र. सं | विधा | विषयक्षेत्रम् | आनुषङ्गिक-विषयविस्तारः | योग्यताविस्तारः | अनुप्रयुक्तव्याकरणम् | शिक्षण घण्टा | पूर्णाङ्काः |
|---|---|---|---|---|---|---|---|
| १ | कविता | वन्दनात्मिका | शक्तिमहिमा | लयबोधः, पाञ्चायनदेवतानां नवग्रहाणाञ्च परिचयः | प्रत्याहारः, अच्सन्धिः | ६ | ५ |
| २ | दैनिकी | होलिकोत्सवदिवसीया | जन्मोत्सवसंस्कारः | अष्टचिरञ्जीविनां षोडशोपचाराणाञ्च परिचयः | वर्णोच्चारणस्थानानि, वर्तमान-भविष्यत्कालिक-क्रियापदानि, ल्युट्प्रत्ययप्रयोगः | ६ | ५ |
| ३ | प्रबन्धः | सामाजिकः | हिमालयीयसमाजः | बौद्धसंस्कृतिः, परम्परा, हिमालयक्षेत्रस्थजातयः | भूतकालिकक्रियापदानि तव्यत्प्रत्ययप्रयोगः, हल्सन्धिः | १० | ८ |
| ४ | कथा | नैतिकी | सदाचारः | नीतिग्रन्थपरिचयः, अनुच्छेदरचना | कारकप्रयोगः, सर्वनामशब्दरूपावलिः | १२ | १० |
| ५ | कविता | आध्यात्मिकी | आत्मज्ञानम् | गीतापरिचयः, आस्तिकनास्तिकदर्शनपरिचयः | विध्यर्थप्रयोगः (लोट्लकारः), अनीयर्प्रत्ययप्रयोगः, विसर्गसन्धिः | ६ | ५ |
| ६ | संवादः | इतिहासविषयकः | नेपालिनो वीरता | वैदिकलौकिकसंस्कृतस्य परिचयः, शिलापत्रस्य ताम्रपत्रस्य च प्रयोगः | आत्मनेपदिनां धातूनां वर्तमानकालेऽभ्यासः, इकारान्तपुँल्लिङ्गशब्दप्रयोगः | १२ | १० |
| ७ | पत्रम् | वैयक्तिकम् | अनौपचारिकपत्रम् | वर्धापनपत्ररचना, | उपसर्गप्रयोगः, | ९ | ७ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | महापुरुषलिखितपत्रम् | ईकारान्तस्त्रीलिङ्गशब्दप्रयोगः | | |
| ८ | कथा | दार्शनिकी | मनसो बन्धनमोक्षयोः कारणान्युपायाश्च | संवेगव्यवस्थापनम्, मनसो भावाभिव्यक्तिः | परस्मैपदिनां धातूनां विधिलिङ्प्रयोगः, उकारान्तपुँल्लिङ्गशब्दप्रयोगः | ९ | ७ |
| ९ | प्रबन्धः | सांस्कृतिकः | किरातपर्वपरिचयः | किरातसंस्कृतिपरम्परे, किरातार्जुनीयमहाकाव्यपरिचयः | ऊकारान्तस्त्रीलिङ्गशब्दप्रयोगः | १२ | ८ |
| १० . | जीवनवृत्तम् | पौरस्त्यवैज्ञानिक सम्बद्धम् | वैज्ञानिकाविष्कारः, प्रेरकवार्तालापः | गद्यांशाधृतशीर्षकनिर्धारणम्, प्राविधिकशब्दज्ञानम् | अनुस्वारसन्धिः, क्तिन्प्रत्ययप्रयोगः | ७ | ५ |
| ११. | गानम् | प्राकृतिकम् | लयभेदाः | नैपालकप्रकृतिः, जलवायुपरिचयः | इकारान्तनपुंसकलिङ्गशब्दप्रयोगः, समासपरिचयः | ७ | ५ |
| सैद्धान्तिकाभ्यासः | | | | | | ९६ | ७५ |
| प्रयोगाभ्यासः | | | | | | ३२ | २५ |
| योगः | | | | | | १२८ | १०० |

## ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

| कक्षा ९ | | कक्षा १० | |
|---|---|---|---|
| **विषयक्षेत्राणि** | **शिक्षणघण्टा** | **विषयक्षेत्राणि** | **शिक्षणघण्टा** |
| पत्रपत्रिकाभ्योऽन्यलिखितसामग्रीभ्यो वा शब्दात्मकं गद्यांशं पद्यांशं वा निर्दिश्य गति-यति-लयानुकूल्येन भावानुकूल्येन च सस्वरवाचने प्रवर्तनम् | ८ | किञ्चिद्विषयवस्तु, चित्रं परिवेशादिकं निर्दिश्य मौखिकवर्णनम् । | ८ |
| वैतन्तुक-दूरभाष-चलभाष-दूरदर्शन-सूक्ष्मसंस्मृतिशलाकादीनां वैद्युतोपकरणानामन्तःसञ्जाल-सामाजिकसञ्जालादीनाञ्च माध्यमेन संवाद-समाचार-साहित्यिकाभिव्यक्तिः श्रुतलेखनञ्च | ८ | सामयिकविषयवस्तुसम्बद्ध-परियोजनाकार्यस्य प्रतिवेदनमन्तर्वार्ता च | ८ |
| सन्देशमूलकगद्यांशं पद्यांशं वा श्रावयित्वा अनुमान-पूर्वानुमान-प्रश्नोत्तर-शब्दार्थबोध-भावबोध-सन्दर्भबोध-कथाकथन-घटनावर्णन-मुख्यसूत्रीकरणसम्बद्धान् प्रश्नान् पृष्ट्वा उत्तरकथनं लेखनञ्च | ८ | सन्देशमूलकगद्यांशं पद्यांश वा श्रावयित्वा अनुमान-पूर्वानुमान-प्रश्नोत्तर-शब्दार्थबोध-भावबोध-सन्दर्भबोध-कथाकथन-घटनावर्णन-मुख्यसूत्रीकरणसम्बद्धान् प्रश्नान् पृष्ट्वा उत्तरकथनं लेखनञ्च | ८ |
| विषयवस्तूनामाधारेण अनुमान-पूर्वानुमान-प्रश्नोत्तर-शब्दार्थबोध-भावबोध-सन्दर्भबोध-कथाकथन-घटनावर्णन-मुख्यसूत्रीकरणसम्बद्धान् प्रश्नान् पृष्ट्वा उत्तरकथनं लेखनञ्च | ८ | विषयवस्तूनामाधारेण अनुमान-पूर्वानुमान-प्रश्नोत्तर-शब्दार्थबोध-भावबोध-सन्दर्भबोध-कथाकथन-घटनावर्णन-मुख्यसूत्रीकरणसम्बद्धान् प्रश्नान् पृष्ट्वा उत्तरकथनं लेखनञ्च | ८ |
| योगः | ३२ | योगः | ३२ |

## ६. शिक्षणसञ्चालनप्रक्रिया

शिक्षकैः छात्राणां भाषिकक्षमतायाः प्रवर्धनाय शिक्षणसामग्र्याधारिताः तत्सम्बद्धास्तदतिरिक्ताश्च कार्यक्रमाः संयोजनीयाः । यतो हि छात्राणां वैयक्तिकक्षमताभिवर्धनाय भाषिकशिल्पविकासपरः कार्यकलापोऽपेक्षितो भवति । छात्रेभ्यो नवीनज्ञानाभिमुखस्य शिक्षणस्य अवसरप्रदानेन शिक्षकैः पृष्ठपोषणञ्च कार्यम् । शब्दभाण्डागारस्य ज्ञानस्याभिवृद्धये अधिकाधिकसन्दर्भसामग्रीणाम् अध्ययनाय छात्राः प्रेरणीयाः । तदर्थं छात्रकेन्द्रितो शिक्षणविधिश्च अपेक्षितः ।

पाठशिक्षणक्रमे पाठयिष्यमाणेन पाठेन सम्बद्धानां विषयवस्तूनां सामान्यतः सङ्केतं कृत्वा तद्विषयेऽनुभवपूर्वज्ञानादिप्रस्तुतये छात्राः प्रेरणीयाः । तत्र कक्षायां पाठसम्बद्धानां कथासन्दर्भगतानां वा विषयाणां श्रावणेन छात्रमनःसु पाठविषयिणी जिज्ञासा समुत्पादनीया । अनुभवश्रावण-प्रश्नोत्तर-विमर्शादिमाध्यमेन छात्रेषु रुचिं समुत्पाद्यैव पाठारम्भः करणीयः ।

यथा शिक्षणं प्रभावकारि स्यात्तथा कक्षा व्यवस्थापनीया । कक्षायां शिक्षणसामग्रीणां व्यवस्थापनेन कक्षायाः सज्जता सम्पादनीया । पाठ्यवस्तुभिः सम्बद्धानां सामग्रीणां भित्तौ श्लेषणम्, वस्तुधान्यां स्थापनम्, सूचनपट्टादिषु योजनञ्च कर्तव्यम् । गणितीयतथ्यानाम्, प्रयोगात्मकविषयाणां सामग्रीणाम्, भाषाविषयाणां शब्दादिसूचीनाञ्च व्यवस्थापनेन कक्षा सज्जीकरणीया । एतेन कक्षाव्यवस्थापनेन कक्षाया अवस्थितिः शिक्षणानुकूला भवति ।

कक्षाशिक्षणे शिक्षक एकाकिभाषणात्मकं विधिं नावलम्बयेत् । तत्र सामूहिककार्यकलापमाध्यमेन छात्राणां शिक्षणं प्रभावकारि भवति । शिक्षकः केवलं स्वाभ्यस्तविषयाणां प्रकाशको न भूत्वा छात्राणामन्तर्निहितज्ञानस्य च समुद्बोधको भवेत् । छात्रपक्षत एव पाठ्यवस्तुपरिचर्यायै पर्याप्तावसरस्य कक्षापर्यावरणं निर्मेयम् । एतेन शिक्षणस्य सहजीकरणं भवति ।

शिक्षणसामग्रीणां प्रयोगः शिक्षणकाले वैविध्येन भवति । तत्र सम्मार्जनी-श्वेतफलक-वर्णलेखन्यादीनां दैनिकरूपेण प्रयोगार्हवस्तूनां प्रयोगमन्तरापि अन्याश्च विषयसम्बद्धाः पाठसन्दर्भगताः सामग्र्यश्च भवन्ति । तेषां यथाशक्यमाधिक्येन प्रयोगः छात्रेभ्यो विषयबोधार्थं सम्यक् उपकारी सेत्स्यति ।

छात्राणां ग्रहणक्षमतायाः स्तरस्य चाधारेण शिक्षणविधेरुपयोगः शिक्षकैः करणीयः । छात्रेषु अपेक्षितं कौशलम्, ज्ञानम्, पाठ्यक्रमोचितं कार्यान्वयनं कर्तुञ्च शिक्षकाः शिक्षणसहजीकरणस्य अग्रे निर्दिष्टाः प्रक्रिया आलम्बितुं शक्नुवन्ति ।

**(क) प्रयोगविधिः**

सम्प्रेषणात्मकविधिना भाषायाः अभ्यासोऽपि शिक्षणसहजीकरणस्यैव एका प्रक्रिया अस्ति । एतदर्थं विविधेषु सन्दर्भेषु प्रयोज्यानां संवादादीनामभ्यासोऽपेक्ष्यते । विविधं परिवेशम्, सन्दर्भञ्च उद्भाव्य तदनुकूलो भाषिककार्यकलापः समायोजनीयो भवति । एतादृशे भाषिककार्यकलापे शिक्षकस्य सहावस्थित्या सह साहाय्यञ्च छात्रेभ्योऽपेक्षितं भवति । सन्दर्भेऽस्मिन् शिक्षकेण छात्रेभ्यः प्रयोज्यानां परिस्थित्यनुसारेण नैकनवीनशब्दानां बोधार्थमवसरः प्रदेयः ।

तथैव शिक्षकाः छात्राणां भाषिकशिल्पविकासाय पाठान्तर्गतानां तदतिरिक्तनाञ्च भाषाप्रयोगोदाहरणानामभ्यासं कक्षायां कारयेयुः । व्याकरणनियमावलम्बिनं भाषाप्रयोगमाधृत्य प्रस्तुतिः, सामूहिकाभ्यासः, आकृतिनिर्माणम्, लेखनाभ्यासः,

अनुच्छेदादिरचना, पाठ्यवाचनञ्चेत्यादीनां विधीनां प्रयोगेण छात्राणां भाषाप्रयोगक्षमता वृद्धिं यास्यति ।

**(ख) प्रदर्शनविधिः**

छात्राणां भाषिकस्तराभिवृद्धये प्रदर्शनात्मको विधिरत्यन्तं प्रभावकारि भवति । तत्र छात्रान् चित्राणि यथासम्भवं श्रव्यदृश्यसामग्रीश्च प्रदर्श्य शिक्षणं कर्तव्यम् । सामग्रीणां प्रदर्शनानन्तरं प्रदर्शितसामग्रीमाधृत्य वार्तालापेन ज्ञानं सुदृढं सम्पद्यते । सामग्रीणां प्रदर्शनानन्तरं प्रश्नोत्तरकार्यकलापश्च अपेक्षितो भवति ।

**(ग) प्रश्नोत्तरविधिः**

विषयवस्तुबोधार्थं छात्राणां मध्ये प्रश्नोत्तरात्मकः कार्यकलापः सञ्चालनीयः । तत्र केचन पाठ्यविषयमाधृत्य प्रश्नान् उपस्थापयन्ति, केचन छात्राश्च उत्तरं यच्छन्ति । एतादृशे कार्यकलापे श्रवणभाषणशिल्पयोरुपयोगो भवति । कार्यकलापेऽस्मिन् पाठगतान् सन्दर्भान्, कथांशान्, पद्यांशान्, विषयवस्तु च उद्भाव्य प्रश्नोत्तरक्रिया प्रचाल्यते । एतेन पाठ्यवस्तुनः शिक्षणे सहजीकरणं भवति ।

**(घ) अभिनयविधिः**

भाषिकक्षमतावर्धनाय पाठगतानां संवादानां पात्रत्वं छात्रेषु परिकल्प्य अभिनयं कारयितुं शक्यते । संवादाभिनयेन छात्राणां परस्परं स्वतन्त्रतया संवादेन वा शिक्षणं सहजं करणीयम् । नाटकीयशैल्या संवादविधानेन छात्राः साभिनयं संलपितुं प्रभवन्ति । छात्राणां सामूहिकप्रस्तुत्यनन्तरं शिक्षकात् प्राप्ता मूल्याङ्कनप्रतिक्रिया च छात्राणां भाषाप्रयोगात्मकं कौशलं परिपोषयति ।

**(ङ) विमर्शविधिः**

पाठ्यवस्तु आधृत्य कक्षायां छात्रशिक्षकाणां मध्ये सामूहिको विमर्शो व्यवस्थापनीयः । भाषिककार्यकलापे स्वपठनम्, युगलपठनम्, समूहपठनञ्च कारयित्वा उच्चारणाद्यभ्यासविषये च सामूहिकरूपेण विमर्शनीयम् । सन्दर्भेऽस्मिन् छात्रशिक्षकाणां मिथः संवादः, कथावाचनम्, घटनावर्णनम्, कथासन्देशकथनम्, दैनिकीवर्णनमित्यादिः कार्यकलापः भवितुं शक्नोति ।

## ७. मूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे, सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलपान् कारयित्वा

सैद्धान्तिकज्ञानशिल्पयो-रवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

अस्य स्तरस्य विद्यार्थिनां मूल्याङ्कनमक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मिका निर्णयात्मिका च प्रक्रिया अवलम्ब्यते । छात्राणां स्तरगतसामर्थ्योपलब्धये विधातव्यैरध्ययनभ्रमण-घटनावलोकन-सर्जनकार्य-वैयक्तिकसामूहिकविमर्शन-लिखितपरीक्षा-प्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-भाषिकव्यवहारप्रभृति-कार्यै-र्निर्माणात्मकं मूल्याङ्कनं विधीयते येन अविच्छिन्नं मूल्याङ्कनं सम्पद्यते । स्तरगतसामर्थ्योपलब्धये कक्षागतसामर्थ्योपलब्धये च शैक्षिकसत्रस्यान्तेऽन्तिमपरीक्षाया माध्यमेन निर्णयात्मकमूल्याङ्कनं सम्पाद्यते । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रनिर्माण-मानवीयमूल्यावलम्बन-पर्यावरणसंरक्षण-भाषिकशिल्पार्जनप्रभृतिविषयाणां विकासो मूल्याङ्कनस्य मूलाधारो मन्यते ।

मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपतामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्यङ्कानां कृते आन्तरं परीक्षणम्, प्रतिशतं पञ्चसप्तत्यङ्कानां कृते बाह्यं परीक्षणञ्च विधीयते । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धिः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

## (क) आन्तरं मूल्याङ्कनम्

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । संस्कृतभाषायाः व्याकरणस्य च शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

अत्र क्रमे कक्षाध्यापकेन विधागतलेखनाय सिर्जनात्मकलेखनाय च प्रेरणम्, सूत्रोच्चारणाय सूत्रार्थापनाय च प्रेरणम्, सूत्रार्थावबोधनम्, उदाहरणेषु सूत्रप्रवर्तननिदर्शनम्, उदाहरणेषु प्रत्युदाहरणेषु च पार्थक्यबोधनाय प्रश्नोत्तराणि, सामूहिकी चर्चा, समूहविभाजनं कृत्वा समस्यायाः समाधानम्, नवीनोदाहरणचयनाभ्यासः, रूपावलिसञ्चालनाय कथनम्, रूपसिद्धिप्रक्रियालेखनाय प्रेरणम्, समासे लौकिकालौकिकविग्रहप्रदर्शनाय कथनम्, तिङन्ते समानप्रकृतिकानां धातूनां रूपावलिसञ्चालनाय प्रेरणादिकं कार्यम् ।

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

## (ख) बाह्यमूल्याङ्कनम्

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

## विशिष्टीकरणतालिका

**कक्षा : १०** **पूर्णाङ्काः ७५**

**समयः घण्टात्रयम्**

| क्र. स. | विषयक्षेत्रम् (पठनं लेखनञ्च) | प्रश्नप्रकृतिः | ज्ञानम् | | | बोधः | | | शिल्पम् | | | उच्चदक्षता | | | प्रष्टव्याः प्रश्न सङ्ख्याः | अङ्क भारः | स्पष्टीकरणम् |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | क | ख | ग | क | ख | ग | क | ख | ग | क | ख | ग | | | |
| १. | गद्यम् | ज्ञान-बोध-प्रयोगोच्च-दक्षतात्मिका | ३ | - | - | ३ | - | - | - | २० | - | - | - | १६ | १२ | ४२ | **ज्ञानबोध**क्षेत्रतः-<br>पठितगद्यांशाद् एकपदेन उत्तरलेखनार्थं द्वौ प्रश्नौ । (१ अङ्कः)<br>एकवाक्येन उत्तरलेखनार्थञ्च द्वौ प्रश्नौ । (२ अङ्कौ)<br><br>अपठितगद्यांशाद् एकपदेन उत्तरलेखनार्थं द्वौ प्रश्नौ । (१ अङ्कः)<br>एकवाक्येन उत्तरलेखनार्थञ्च द्वौ प्रश्नौ । (२ अङ्कौ)<br>**शिल्प**क्षेत्रतः-<br>पत्ररचनासम्बद्ध एकः प्रश्नः (रिक्तस्थानपूर्तिः) । (५ अङ्काः)<br>संवादरचनासम्बद्ध एकः प्रश्नः (संलापपूर्तिः) । (५ अङ्काः)<br>कथारचनासम्बद्ध एकः प्रश्नः (घटनासंयोजनम्) । (५ अङ्काः)<br>दैनिकीसम्बद्धो जीवनवृत्तसम्बद्ध वा एकः प्रश्नः ( क्रमयोजनम्) । (५ अङ्काः)<br>**उच्चदक्षता**क्षेत्रतः-<br>अनुच्छेदरचनासम्बद्ध एकः प्रश्नः । (८ अङ्काः)<br>चित्रवर्णनसम्बद्ध एकः प्रश्नः । (८ अङ्काः) |
| २. | पद्यम् | प्रयोगोच्च-दक्षतात्मिका | - | - | - | - | - | - | - | ५ | - | - | - | ८ | २ | १३ | **शिल्प**क्षेत्रतः-<br>अन्वयलेखनसम्बद्ध एकः प्रश्नः । (५ अङ्काः)<br>**उच्चदक्षता**क्षेत्रतः-<br>भावार्थलेखनसम्बद्ध एकः प्रश्नः । (४ अङ्काः)<br>पद्याधारेण विषयवर्णनसम्बद्ध एकः प्रश्नः । (४ अङ्काः) |
| ३. | अनुप्रयुक्त-व्याकरणम् | ज्ञान-बोध-प्रयोगात्मिका | २ | - | - | ३ | - | - | - | १५ | - | - | - | - | ८ | २० | **ज्ञानबोध**क्षेत्रतः-<br>वर्णोच्चारणस्थानसम्बद्ध एकः प्रश्नः । (१ अङ्कः)<br>प्रत्याहारलेखनसम्बद्ध एकः प्रश्नः । (१ अङ्कः)<br>लिङ्गकालपदवर्गनिर्धारणसम्बद्ध एकः प्रश्नः । (३ अङ्काः) |

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | | | | | | | **शिल्प**क्षेत्रतः-<br>निर्धारितप्रत्यययोजनेन सन्धियोगेन वियोगन वा, समासेन विग्रहेण वा  शब्दरचनासम्बद्ध एकः प्रश्नः । (५ अङ्काः)<br>लकाररूपावलीप्रयोगसम्बद्धः<br>कारकविभक्तिनिर्धारणसम्बद्धश्च एकः प्रश्नः । (५ अङ्काः)<br>कर्तृकर्मक्रियापदैर्वाक्यपूर्तिसम्बद्ध एकः प्रश्नः । (५ अङ्काः) |
| योगः | | | ५ | | | ६ | | | | ४० | | | | २४ | २२ | ७५ | |

# प्रश्नपत्रनिर्देशः

**कक्षा :** १०

**समयः** घण्टात्रयम् **पूर्णाङ्काः** ७५

१. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत**

नेपालस्य उत्तरदिशि बहवः हिमालयाः सन्ति । तेषु सर्वोन्नतहिमालयः 'सगरमाथा' अत्रैव विराजते । हिमालयक्षेत्रेषु प्रमुखरूपेण शेर्पाः वसन्ति । ते नववर्षोत्सवरूपेण 'ल्होसार' इति पर्व मानयन्ति । तेषु क्षेत्रेषु अतीव शैत्यं भवति । अतः ते 'बख्खु' 'दोचा' इत्यादीनि वस्त्राणि धारयन्ति । ते च बौद्धसंस्कृतिम् अनुसरन्ति ।

**(क) एकपदेन उत्तरत** **०.५×२=१**

(अ) सर्वोन्नतहिमालयस्य नाम किम् ?

(आ) हिमालयीया जनाः किं पर्व मानयन्ति ?

**(ख) एकवाक्येन उत्तरत** **१×२=२**

(अ) हिमालयाः कुत्र सन्ति ?

(आ) शेर्पाः कानि वस्त्राणि धारयन्ति ?

२. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत**

काष्ठमण्डपे जनानां निवासविषये एका किंवदन्ती प्रचलिता अस्ति । पुरा इयम् उपत्यका जलमग्ना आसीत् । तस्मात् कारणाद् अत्र न कोऽपि जनः वसति स्म । एकदा भगवान् श्रीकृष्णः अत्र आगत्य चक्रेण चोभारस्थितस्य पर्वतस्य भेदनम् अकरोत् । केचित् च चिनदेशाद् मञ्जुश्री आगत्य असिप्रहारेण तस्यैव पर्वतस्य भेदनम् अकरोद् इति च विश्वसन्ति । तत्पश्चाद् एव मानवाः अत्र आगत्य गृहादिकं निर्माय कृषिकर्म प्रारभन्त इति इतिहासविदो वदन्ति ।

**(क) एकपदेन उत्तरत** **०.५×२=१**

(अ) 'काष्ठमण्डपः' इति उपत्यका पूर्वं कीदृशी आसीत् ?

(आ) श्रीकृष्णः केन पर्वतस्य भेदनम् अकरोत् ?

**(ख) एकवाक्येन उत्तरत** **१×२=२**

(अ) जना मञ्जुश्री किम् अकरोद् इति विश्वसन्ति ?

(आ) पर्वतस्य भेदनानन्तरं मानवाः किम् अकुर्वन् इति इतिहासविदो वदन्ति ?

**३. भवत्याः नाम डोल्मा अस्ति । भवती विद्यालयाद् भ्रमणार्थं गता आसीत् । तद् भ्रमणं वर्णयित्वा स्वसखीं राजामतीं प्रति लिखिते पत्रे मञ्जूषातः समुचितानि पदानि चित्वा रिक्तस्थानं पूरयत ०.५×१०=५**

नारायणस्थानम्, काष्ठमण्डपः

............. - २०७८।०१।१६

प्रियसखि ..............,

सस्नेहं .................. ।

अहम् अत्र कुशलिनी अस्मि । भवती अपि तत्र .................. एव अस्ति इति विश्वसिमि । अस्माकं विद्यालयाद् ह्यस्तनदिवसे वयं भ्रमणार्थं त्रिभुवनविश्वविद्यालयस्य ...................... अगच्छाम । तत्र विविधविषयाणां बहूनि ............... आसन् । ग्रन्थपालैः विषयानुसारम् एव पुस्तकानि एकत्र स्थापितानि आसन् । पुस्तकालये जनाः ............ स्थित्वा पुस्तकानि पठन्तः आसन् । .................. निषिद्ध आसीत् । तत्र घण्टाद्वयं व्यतीत्य वयं ............... प्रत्यागच्छाम । अवकाशसमये तत्र गत्वा पुस्तकानि पठिष्यामि इति अहं .............. अकरवम् । समयः मेलिष्यति चेत् भवती अपि आगच्छतु । अद्य एतावता एव विरमामि ।

भवदीया प्रिया .....

डोल्मा

| |
|---|
| नमस्ते, कुशलिनी, राजामति, दिनाङ्काः, पुस्तकानि, पुस्तकालयम्, विद्यालयम्, सखी, कोलाहलः, निश्चयम्, |

**४. मञ्जूषायाः साहाय्येन संवादं पूरयत १×५=५**

(मोहनलाल आपणं गच्छन् आसीत् । मार्गे स सरलाम् अपश्यत् ।)

मोहनलालः - सरले, कुतः आगच्छन्ती असि ?

सरला - अहम् आपणं गता आसम् । ततः एव आगच्छन्ती अस्मि । .................. ?

मोहनलालः - अहं विटपक्रयणार्थम् आपणं गच्छन् अस्मि । ................................. । त्वं नजानासि किम् ?

सरला - अस्मिन् विषये न कश्चिद् अवोचद् माम् ।

मोहनलालः - वृक्षरोपणेन वातावरणस्य संरक्षणं भवतीति तु त्वं वेत्सि एव ।

सरला - तत्तु जानामि एव । ........................................ ?

मोहनलालः - दिनस्य एकवादने अस्ति ।

सरला - अहं पितरौ अपि आनीय सहभागिनी भविष्यामि ।

मोहनलालः - समीचीनम् । ...................................................... । अधुना विलम्बो जायमानः अस्ति ।

सरला - ................................ ।

(तौ ततो निरगच्छताम् ।)

| |
|---|
| अद्य ग्रामे वृक्षरोपणस्य कार्यक्रमः अस्ति, कतिवादने कार्यक्रमः अस्ति, त्वम् च कुत्र गच्छन् असि, गच्छाव तर्हि, अहम् अपि परिवारजनान् आनेष्यामि । |

**५. घटनासंयोजनेन कथां रचयत** **०.५×१०=५**

**मूर्खः सेवकः**

(क) एकदा स कार्येण परिश्रान्तः सन् दिवसे एव स्वपितुम् अगच्छत् । तदा वानरः तं सेवितुं तेन सह शयनकक्षे अगच्छत् ।

(ख) एकस्मिन् नगरे एको धनिकः निवसति स्म । तस्य बहवः कर्मकराः सेवकाश्च आसन् ।

(ग) एका मक्षिका उड्डीय तत्र आगच्छत् । सा च कदाचिद् धनिकस्य ललाटे, कदाचिद् हस्ते, कदाचिद् वक्षसि अतिष्ठत् ।

(घ) धनिकः अस्वपत् परन्तु वानरः व्यजनं चालयित्वा तत्रैव अतिष्ठत् । धनिको निद्रामग्न आसीत् ।

(ङ) ततः स महानसात् छुरिकाम् आनयत् । मक्षिका च धनिकस्य नासिकायाम् अतिष्ठत् ।

(च) सा च पुनः पुनरागत्य धनिकस्य शरीरावयवेषु अतिष्ठत् । वानरः क्रुद्धो जातः ।

(छ) धनिकः मूर्खसेवकस्य नियुक्तिः सर्वथा हानये भवतीति ज्ञात्वा वानरं भवनाद् निष्काशितवान् ।

(ज) क्रुद्धो वानरः नासिकायां छुरिकया प्रहारम् अकरोत्, मक्षिका उड्डीय अन्यत्र अगच्छत् परन्तु धनिकस्य नासिका छिन्ना अभवत् ।

(झ) तेषु एको वानरोऽपि सेवक आसीत् ।

(ञ) वानरो व्यजनेन शनैः शनैः तां न्यवारयत् ।

**६. क्रमयोजनेन दैनिकीं रचयत** **०.५×१०=५**

- नववादने विद्यालयं प्राप्य मित्रैः सह अध्ययनं क्रीडनं च अहम् अकरवम् ।
- व्यायामं कृत्वा अहं शौचादिकम् अकरवम् ।

- तत्पश्चात् कारयानेन पिता मां विद्यालयं प्रापयत् ।
- त्रिवादने विद्यालयाद् अहं गृहम् आगच्छम् ।
- गृहकार्यं समाप्य अहं दूरदर्शनस्य माध्यमेन समाचारं दृष्ट्वा भोजनम् अखादम् ।
- नित्यपूजाम् समाप्य अहं षड्वादने चायम् अपिबम् ।
- गृहम् आगत्य खाद्यं खादित्वा अहं गृहकार्यं कर्तुं सन्नद्धोऽभवम् ।
- घण्टाद्वयं विद्यालयस्य विषयान् अपठम् । भोजनं कृत्वा विद्यालयस्य परिधानम् अधारयम् ।
- तत्पश्चात् क्षणं पुस्तकं पठित्वा अहं नववादने अस्वपम् ।
- अहं प्रातः पञ्चवादने उदतिष्ठम् ।

**७. प्रदत्तपदावलीनां साहाय्येन 'परोपकारः' इति विषये चतुर्भिर्वाक्यैः एकम् अनुच्छेदं रचयत** **२×४=८**

परेषाम् उपकारः

निःसहायाः मानवाः

वृक्षाः छायां काष्ठादीनि च दत्वा

नदी जलं दत्वा

सज्जनाः उपदेशं दत्वा

वस्तूनां दानम्

पुण्यार्जनाय परोपकारः

अस्माकं धर्मः

**८. मञ्जूषायां प्रदत्तपदानां सहायतया चतुर्भिर्वाक्यैः चित्रं वर्णयत** **२×४=८**

| |
|---|
| एउटा मञ्च, ब्यानरमा सम्भाषणप्रतियोगिता लेखेको, मुनि चाहिँ आयोजकः श्रीवाल्मीकिविद्यालयः लेखेको, मञ्चको बायाँतिर एउटी छात्रा माइकअगाडि बोल्दै गरेकी, दायाँतिर कलम समाएर बसेका ३ जना निर्णायकको ब्याच लगाएका, बिचमा सभाध्यक्ष र प्रमुखअतिथिको ब्याच लगाएक दुईजना,<br>अगाडिपट्टि श्रोता भएको ठुलो चित्र |

| |
|---|
| मञ्चः, विशालः, सम्भाषणप्रतियोगिता, निर्णायकाः, प्रतियोगिनी, छात्रा, श्रोतारः, विद्यालयः |

**९. रिक्तस्थानं पूरयित्वा अधोलिखितयोः श्लोकयोः अन्वयं लिखत** **२×२.५=५**

(क) या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

अन्वयः .......... या .............. शक्तिरूपेण ..............., तस्यै ........, तस्यै नमः, तस्यै नमः, नमो .......... ।

(ख) नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।

न चैनं क्लेदयन्त्यापो न शोषयति मारुत : ॥

अन्वयः ........... एनं न छिन्दन्ति, ...........एनं न ............., आपः ......... न क्लेदयन्ति, .................. (एनं) न शोषयति ।

**१०. निर्देशानुसारम् उत्तरं दत्त**

**(क) अधोलिखितस्य श्लोकस्य भावार्थं लिखत** **४**

वासांसि जीर्णानि यथा विहाय

नवानि गृह्णाति नरोऽपराणि ।

तथा शरीराणि विहाय जीर्णा

न्यन्यानि संयाति नवानि देही ॥

**(ख) अधोलिखितं श्लोकमाधृत्य 'सत्सङ्गतिः' इति विषयस्य चतुर्भिर्वाक्यैर्वणनं कुरुत** **१×४=४**

जाड्यं धियो हरति सिञ्चति वाचि सत्यम्

मानोन्नतिं दिशति पापमपाकरोति ।

चेतः प्रसादयति दिक्षु तनोति कीर्तिम्

सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥

**११. अधोलिखितयोर्वर्णयोः उच्चारणस्थानं लिखत** **०.५×२=१**

ग, फ

**१२. अधोलिखितयोः प्रत्याहारयोः वर्णान् लिखत** **०.५×२=१**

अच्प्रत्याहारः -

यण्प्रत्याहारः -

**१३. निर्देशानुसारं कार्यं कुरुत** **१×३=३**

(क) 'त्वं पुस्तकं पठिष्यसि' अस्य कालः कः ?

(ख) 'वृक्षाः फलं यच्छन्ति' अत्र वृक्षशब्दः कस्मिन् लिङ्गे वर्तते ?

(ग) 'सा पक्वं फलं खादति' अत्र विशेषणपदं किम् ?

**१४. कोष्ठस्थसङ्केतानुसारं रिक्तस्थानं पूरयत** **१×५=५**

(क) अस्माभिः कार्यं ................ । (कृ+अनीयर्)

(ख) छात्राः ............. गच्छन्ति । (वृद्ध+आश्रमं, सन्धियोगः)

(ग) मित्रं ................. आसीत् । (तत्रैव, सन्धिवियोगः)

(घ) कालिदासः ........... अस्ति । (महान् कविः, समासः)

(ङ) विद्यालयः .............. वर्तते । (ज्ञानमन्दिरं, विग्रहः)

**१५. सङ्केतानुसारं रूपं निर्माय वाक्यस्य पुनर्लेखनं कुरुत** **१×५=५**

(क) ते (बालिका, चतुर्थी विभक्तिः, बहुवचनम्) फलानि यच्छन्ति ।

(ख) अहं (ग्राम, कर्मकारकम्, एकवचनम्) गत्वा कृषिकर्म करोमि ।

(ग) त्वं निबन्धम् (पठ्, लङ्लकारः) ।

(घ) वयं भ्रमणाय पोखरानगरं (गम्, लृट्लकारः) ।

(ङ) पर्यटकाः अतिथिगृहे (निवस्, लट्लकारः) ।

**१६. सङ्केतानुसारं कर्तृकर्मक्रियापदैर्वाक्यं पूरयत** **१×५=५**

(क) महिलाः आपणं गच्छन्ति, (तत्शब्दः) ......... वस्तूनि क्रीणन्ति ।

(ख) अहं नवीनानि (वस्त्र) ........... धारयामि ।

(ग) यूयं चत्वरे (क्रीड्) ................. ।

(घ) (कृषक) ............... क्षेत्रे कार्यं कुर्वन्ति ।

(ङ) सीता (कविता) ............ लिखति ।

**<<<>>>**